# Shri Jagannatha Navakam

# શ્રીજગન્નાથનવકમ્

## Document Information

Text title : Jagannatha Navakam

File name : jagannAthanavakam.itx

Category : vishhnu, pradIptakumAranandа, krishna, nava

Location : doc_vishhnu

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : September 7, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2020

*sanskritdocuments.org*

# શ્રીજગન્નાથનવકમ્

પારાવારપતિઃ પુરીપુરપતિસ્સૌભાગ્યલક્ષ્મીપતિઃ
    શ્રીક્ષેત્રાધિપતિર્મહેશ્વરપતિર્માયાપતિર્ભૂપતિઃ ।
શ્રીવૈકુણ્ઠપતિર્જગજ્જનપતિર્માધુર્યલીલાપતિઃ
    દારુબ્રહ્મપતિર્મહામખપતિઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૧॥

હે નારાયણ હે જગજ્જયકૃતે હે વિશ્વબન્ધો પ્રભો
    હે વૈકુણ્ઠસનાતન ગ્રહપતે હે રામનારાયણ ।
હે નીલાચલનાયક પ્રવણ હે હે શ્રીજગન્નાથ માં
    હે રાધાધવ પાહિ પાહિ સતતં વન્દામિ નન્દાત્મજમ્ ॥ ૨॥

ગોલાકારાક્ષયુક્તા નિખિલમણિમયી હેમભૂષાઙ્ગશોભા
    શ્યામા કામાભિરામા સ્વજનસહરતા પ્રેમધારાવહન્તી ।
યા સા સંસારસારા શ્રિતજનવિષયા બ્રહ્મરૂપા પ્રસન્ના
    પાયાત્સંભ્રાન્તનીલાચલભુવનસુખા સ્રગ્ધરા દારુમૂર્તિઃ ॥ ૩॥

સ્વર્ણાલંકૃતદિવ્યદારુરસિકં શ્રીમન્દિરાધીશ્વરં
    વિશ્વાનન્દતનું વિકારરહિતં પુર્ય્યાં મહાસૌરભમ્ ।
ભક્તિપ્રેમધનં દદાતિ પરમં લાવણ્યલક્ષ્મીજુષં
    શ્રીનીલાદ્રિમહોદયં પ્રતિદિનં સૌન્દર્યસારં ભજે ॥ ૪॥

પક્ષીન્દ્રાસીનમગ્ર્યં સકલમણિયુતં યોગમાયાસમેતં
    શઙ્ખં ચક્રં ગદાબ્જં પ્રબલબલયુતં બાહુભિઃ સંદધાનમ્ ।
લાવણ્યં મર્ત્યલોકે નયનસુખકરં પીતપટ્ટામ્બરાઢ્યં
    લક્ષ્મીનારાયણાખ્યં નિરુપમયુગલં દિવ્યદેહં નમામિ ॥ ૫॥

માધુર્યસારરસસારસુખૈકસારં
    વેદાન્તસારસુરસારવિદગ્ધસારમ્ ।
પીયૂષસારઘનસારસુશીતસારં
    શ્રીક્ષેત્રસારહરિસારસુસારમીડે ॥ ૬॥

શુદ્ધં બુદ્ધમબદ્ધમવ્યયમજં દાન્તં પ્રશાન્તં મહઃ
    કાન્તં સન્તતમન્તકારિમનઘોદન્તં મહાન્તં પરમ્ ।
નિત્યં નિર્મલમેકમાદ્યમજડં સત્યાવબોધાત્મકં
    વન્દે તં કમલાપતિં પ્રતિદિનં નીલાદ્રિચૂડામણિમ્ ॥ ૭॥

હે શીતલ પ્રિયહરે કરુણાવતાર
    સૌભાગ્યદારુસુખકારુકલાભિતપ્ત ।
શ્રીમન્દિરેશ નિતરાં તુલસીદલેઽસ્મિન્
    પત્રં લિખામિ પઠ માધવ પક્ષિપત્ર ॥ ૮॥

યોગે ન ભોગસકલેષુ સુખેષુ નિત્યં
    ત્વન્નામધામવિષયે ક્વચિદસ્તિ દૃષ્ટિઃ ।
બ્રહ્માણ્ડનાથ તવ ગૌરવસૌરભાય
    ચેષ્ટા કદા ભવતિ સા ભવિતા સુબુદ્ધિઃ ॥ ૯॥

ઇતિ પ્રદીપ્તનન્દશર્મવિરચિતં શ્રીજગન્નાથનવકં સમાપ્તમ્ ।

Composed, encoded, and proofread by
Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

---

*Shri Jagannatha Navakam*

pdf was typeset on December 28, 2020

Please send corrections to *sanskrit@cheerful.com*